विष्णुं दोलास्थितं दृष्ट्वा त्रैलोक्यस्योत्सवो भवेत्।
तस्मात् कार्य्यशतं त्यक्त्वा दोलाहे उत्सवं कुरु ॥"

अथ दोलोत्सवविधिः ।

"चैत्रस्य शुक्लद्वादश्यां प्रातःकृत्यं समाप्य च ।
नित्यपूजां विधायाथ कुर्य्याद्दोलोत्सवं व्रती ॥
तदर्थञ्च विशेषेण नैवेद्यादिकमर्पयेत् ।
संमान्य वैष्णवांस्तैश्च गीतनृत्यादि कारयेत् ॥
महानीराजनं कृत्वा प्रक्षिपेदच्युतोपरि ।
गन्धानुलेपचूर्णानि विचित्राणि विभागशः ॥
सन्तोष्य वैष्णवांस्तैश्च गीतनृत्यादिभिः प्रभुम् ।
नत्वाभ्यर्थ्याप्रमत्तः सन् दोलामारोहयेच्छुभाम् ॥
नीत्वा बहिर्व्वेदिकायामुत्तुङ्गायां यथाविधि ।
अभ्यर्च्चान्दोलयेत् कृष्णं सर्व्वलोकावलोकितम् ॥
एवमभ्यर्च्चयन् यामे यामे त्वान्दोलयन् प्रभुम् ।
महोत्सवेन गमयेद्दिनं रात्रिञ्च यत्नतः ॥
एवं जागरणं कृत्वा वैष्णवैः सह वैष्णवः ।
प्रणम्य प्रार्थ्य निर्म्मञ्छ्य कृष्णं स्वालयमानयेत् ॥
चैत्रे मासि सिते पक्षे तृतीयायां रमापतिम् ।
दोलारूढं समभ्यर्च्य मासमान्दोलयेत् कलौ ॥
यत् फाल्गुनस्य राकादावुत्तराफाल्गुनी यदा ।
तदा दोलोत्सवः कार्य्यस्तत्र श्रीपुरुषोत्तमे ॥"

इति हरिभक्तिविलासः ॥

दोला, स्त्री, नीलिनी । ( दोल्यते अस्यामिति । दोलि+घञ्+टाप् ।) उद्यानादिषु क्रीड़ार्थं काष्ठादिमयो हिन्दोलकः । हिँदला इति भाषा । वाह्यखट्वा । डुली इति भाषा । तत्पर्य्यायः । प्रेङ्खा २ । इत्यमरः । २ । ८ । ५३ ॥ दोली ३ खट्वाला ४ दोलिका ५ । इति शब्दरत्नावली ॥ प्रेङ्खः ६ । इति भरतधृतरत्नकोषः ॥ हिन्दोला ७ । इति हारावली । २१४ ॥ ( यथा, महाभारते । ३ । ६२ । २७ ।

"द्विधेव हृदयं तस्य दुःखितस्याभवत् तदा ।
दोलेव मुहुरायाति याति चैव सभां प्रति ॥" )

दोलारोहणगुणाः । वातकोपनत्वम् । अङ्गस्थैर्य्यबलाग्निकारित्वञ्च । इति राजवल्लभः ॥ अस्य विवरणं चतुर्दोलशब्दे द्रष्टव्यम् ॥

दोलायमानः, त्रि, ( दोलां करोतीति । दोला+क्यङ् । ततः शानच् । ) दोलनविशिष्टः । यथा,

"दोलायमानं गोविन्दं मञ्चस्थं मधुसूदनम् ।
रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते ॥"

इत्युत्कलखण्डम् ॥

दोलिका, स्त्री, ( दोला+स्वार्थे कन् । टापि अत इत्वम् ।) हिन्दोला । इति हारावली । १८१ ॥

दोली, स्त्री, ( दोल्यते अनयेति । दोलि+इन् । कृदिकारादिति वा ङीष् ।) दोला । इति शब्दरत्नावली ॥ डुली इति भाषा ॥

दोषः, पुं, (दूष्यते इति । दुष वैकृत्ये+णिच्+भावे घञ् । ) दूषणम् । यथा,—

"अदाता वंशदोषेण कर्म्मदोषाद्दरिद्रता ।
उन्मादो मातृदोषेण पितृदोषेण मूर्खता ॥"

इति चाणक्यम् । ४८ ॥

(दुष्यत्यनेनेति करणे घञ् ।) पापम् । इति मेदिनी । षे, ४ ॥ वातपित्तकफाः । इति शब्दचन्द्रिका ॥ ( यथा,—

"नास्ति रोगो विना दोषैर्यस्मात्तस्माद्विचक्षणः ।
अनुक्तमपि दोषाणां लिङ्गैर्व्याधिमुपाचरेत् ॥"

इति सुश्रुते । १ । ३५ अध्यायः ॥)

गोवत्सः । इति शब्दरत्नावली ॥ ( दुष्यतेऽन्धकारेणेति । दुष्+घञ् । प्रदोषः । यथा, भागवते । ६ । ८ । १९ ।

"देवोऽपराह्णे मधुहोग्रधन्वा
सायं त्रिधामावतु माधवो माम् ।
दोषे हृषीकेश उतार्द्धरात्रे
निशीथ एकोऽवतु पद्मनाभः ॥" )

काव्यगुणेतरः । स च रसाद्यपकर्षकः । यथा,

"मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः ।"

तत्र पददोषा यथा,—

"दुष्टं पदं श्रुतिकटु च्युतसंस्कृत्यप्रयुक्तमसमर्थम् ।
निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्लीलम् ॥
सन्दिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम् ।
अविमृष्टविधेयांशं विरुद्धमतिकृत् समासगतमेव ॥"

वाक्यदोषो यथा,—

"प्रतिकूलवर्णमुपहतलुप्तविसर्गं विसन्धि हतवृत्तम् ।
न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तम् ॥
अर्द्धान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यम् ।
अपदस्थपदसमासं सङ्कीर्णं गर्भितं प्रसिद्धिहतम् ॥
भग्नप्रक्रममक्रममतपरार्थञ्च वाक्यमेवं तथा ॥"

अर्थदोषा यथा,—

"अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः ।
सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च ॥
अनवीकृतः सनियमानियमविशेषाविशेषपरिवृत्ताः ।
साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः ॥
विध्यनुवादायुक्तस्त्यक्तपुनःस्वीकृतोऽश्लीलः ॥"

रसदोषा यथा,—

"व्यभिचारिरसस्थायिभावानां शब्दवाच्यता ।
कष्टकल्पनया व्यक्तिरनुभावविभावयोः ॥
प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः ।
अकाण्डे प्रथनच्छेदावङ्गस्याप्यतिविस्तृतिः ॥
अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्य्ययः ।
अनङ्गस्याभिधानञ्च रसे दोषाः स्युरीदृशाः ॥"

उक्तपदादिदोषाः स्थानविशेषे क्वचित् गुणा भवन्ति । इति काव्यप्रकाशः ॥ * ॥ दोषविशेषा यथा, राजधर्म्मे ।

"यतः प्रभवति क्रोधः कामो वा भरतर्षभ ! ।
शोकमोहौ विधित्सा च परासुत्वञ्च तद्वद ॥
लोभो मात्सर्य्यमीर्ष्या च कुत्साऽसूया कृपा भयम् ॥"

आचमनं विना भक्षणे दोषाभावो यथा,—

"मधुपर्के च सोमे च ताम्बूलस्य च भक्षणे ।
फलमूले चेक्षुदण्डे न दोषं प्राह वै मनुः ॥"

इति कूर्म्मपुराणम् ॥ * ॥

द्वात्रिंशत्प्रकारा दोषा यथा,—

"यानैर्व्वा पादुकैर्व्वापि गमनं भगवद्गृहे ।
देवोत्सवाद्यसेवा च अप्रणामस्तदग्रतः ॥
उच्छिष्टे चैव चाशौचे भगवद्वन्दनादिकम् ।
एकहस्तप्रणामस्तु तथा चैकं प्रदक्षिणम् ॥
पादप्रसारणञ्चाग्रे तथा पर्य्यङ्कबन्धनम् ।
शयनं भक्षणञ्चापि मिथ्याभाषणमेव च ॥
उच्चैर्भाषो मिथोजल्पो रोदनादि च विग्रहः ।
निग्रहानुग्रहौ चैव स्त्रीषु च क्रूरभाषणम् ॥
कम्बलावरणञ्चैव परनिन्दा परस्तुतिः ।
गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा ॥
अपराधास्तथा विष्णोर्द्वात्रिंशत्परिकीर्त्तिताः ॥"

इति पाद्मे पातालखण्डम् ॥ * ॥

(आततायिमारणे अधर्म्मदण्डो दोषो न भवति । यथा, मनुः । ८ । ३५१ ।

"नाततायिवधे दोषो हन्तुर्भवति कश्चन ।
प्रकाशं वाप्रकाशं वा मन्युस्तन्मन्युमृच्छति ॥"

"न कश्चिदपि अधर्म्मदण्डः प्रायश्चित्ताख्यो दोषो वा भवति ।" इति तट्टीकायां कुल्लूकभट्टः ॥ अष्टवसूनामन्यतमः स च वसुः । यथा, भागवते । ६ । ६ । ११ ।

"द्रोणः प्राणो ध्रुवोऽर्कोऽग्निर्दोषो वसुर्विभावसुः ॥")

दोषकः, पुं, ( दोष एव । स्वार्थे कन् ।) गोवत्सः । इति शब्दरत्नावली ॥

दोषग्राही, [ न् ] त्रि, ( दोषं गृह्णातीति । ग्रह+णिनिः ।) दोषग्रहणकर्त्ता । तत्पर्य्यायः । खलः २ पुरोभागी ३ द्विजिह्वः ४ मत्सरी ५ । इति हलायुधः ॥

"विहाय सर्पवद्दोषान् गुणान् गृह्णन्ति साधवः ।
दोषग्राही गुणत्यागी चालनीव हि दुर्ज्जनः ॥"

इत्युद्भटः ॥

दोषज्ञः, त्रि, ( दोषं जानातीति । दोष+ज्ञा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) पण्डितः । इत्यमरः । २ । ७ । ५ ॥ ( यथा, रघुः । १ । ९३ ।

"अथ प्रदोषे दोषज्ञः संवेशाय विशाम्पतिम् ।
सूनुः सूनृतवाक् स्रष्टुः विससर्ज्जोर्जितश्रियम् ॥"

दोषान् वातपित्तकफान् जानातीति । कः ।) चिकित्सकः । इति हेमचन्द्रः । ३ । ५ ॥ दोषविषयकज्ञानयुक्तश्च ॥

दोषत्रयं, क्ली, (दोषाणां वातपित्तकफानां त्रयम् ।) वातपित्तकफाः । इति राजनिर्घण्टः ॥ (दोषाणां त्रयम् । यथाह व्यासः ।

"रूपं रूपविवर्ज्जितस्य भवतो ध्यानेन यद्वर्णितं
स्तुत्याऽनिर्व्वचनीयताखिलगुरोर्दूरीकृतं यन्मया ।
व्यापित्वञ्च विनाशितं भगवतो यत्तीर्थयात्रादिना
क्षन्तव्यं जगदीश ! तत् विकलतादोषत्रयं मामकम् ॥")